International Research Journal of Humanities, Language and Literature
ISSN: (2394-1642)
Impact Factor 8.972 Volume 12, Issue 6, June 2025
Association of Academic Researchers and Faculties (AARF)
Website-www.aarf.asia, Email : editor@aarf.asia , editoraarf@gmail.com

# सामुद्रिकशास्त्रानुसारेण आयुर्विचारः

**चन्दनहोता**
सहायकाचार्यः, ज्योतिषविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा

प्राचीनकालादेव विश्वस्य सर्वासु संस्कृतिषु ज्ञानवैभवपरिपूर्णेयं भारतीयवैदिकसंस्कृति अतीव समृद्धा सुनियोजिता च वर्तते । येषामध्ययनेन वैज्ञानिकवैदिकसमृद्धपरम्परायाः विषये ज्ञानं भवत्यत्र नास्ति संशयावकाशः । भारतीयसुदीर्घज्ञानपरम्परायां नैकानि वेद-वेदाङ्गानि काव्य-पुराणानि शास्त्र-दर्शनादीनि च प्रस्फुटितानि सन्ति । तेषामालोडनेनैव मानवः सत्यविद्यां विन्देत । परन्तु, कालप्रभावात् क्षीणायुः मनुष्यः स्वल्पकालेन तत्साधयितुं न शक्नोति । यदुक्तम्-

**अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्चकालो बहविघ्नता च ।**
**यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात् ।।**[1]

अखिलवैदिकज्ञानपरम्परायाः तत्वार्थबोधनाय कल्पितेषु षड्गेषु चक्षुभूतं ज्यौतिषशास्त्रं चतुर्ल्लक्षात्मकमिति व्यपदिशन्ति विद्वांसः । यथा-

**लक्षं तु चतुरो वेदा लक्षं भारतमेव च।**
**लक्षं व्याकरणं प्रोक्तं चतुर्ल्लक्षं तु ज्यौतिषम्।**[2]

तत्र ज्यौतिषशास्त्रस्य सिद्धान्त-संहिता-होराख्येषु स्कनधत्रेषु संहितास्कन्धे ग्रहाणां ग्रहचारवशात् शुभाशुभलक्षणवशात् भूपृष्ठोपरि सामूहिकप्रभावस्य विवेचनं क्रियते । अपि च वास्तुविद्या-सामुद्रिकशास्त्र-शकुनविद्या-रत्नपरिक्षण-वनस्पतिप्रयोग-शुभाशुभमुहूर्तग्रहशान्त्यादिविषयाः चर्चिताः । यथा-

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् ।**
**तत्कात्स्नर्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।।**[3]
**जनपुष्टिक्षयवृष्टिद्विरदतुरंगादिसकलवस्तुनाम् ।**
**केतुल्कादीनां वा लक्षणमुदितं हि संहितास्कन्धे ।।**[4]

---

[1] **चाणक्यनीतिशास्त्रम्, अ.-१५, श्लो.-१०**
[2] **चरणव्यहसुत्रम्, ख. -०५, श्लो.-०१**
[3] **बृहत्संहिता, अ.-०१, श्लो. -०९**
[4] **प्रश्नमार्गः, अ.-१, श्लो. -०८**

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

तेषु नैकेषु विषयेषु सामुद्रिकशास्त्रे मनुष्यशरीरसंरचनां, अङ्गलक्षणं,हस्तरेखां, रूपं, वर्णं, तिलं, स्वरं, स्वरुपं, स्वभावमित्यादिनां विधिवत्कुशलोऽवलोक्य जन्मकालादारभ्य मृत्युपर्यन्तं नैके शुभाशुभविषयाः वरिवर्णिताः सन्ति। यथा-

**उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्वमनूकमादौ।**
**क्षेत्रं मृजाञ्च विधिवत्कुशलोऽवलोक्य सामुद्रविद्वदति यातमनागतं वा।।**[5]

तेषु सर्वेषु विषयेषु आयुविचारः सर्वादौ करणीयः। किमिति यदि जातशिशुः निरायुषः भवति चेत् शुभाशुभफले तस्य किं प्रयोजनम्? यदुक्तम्-

**पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत्।**
**निरायुषः कुमारस्य लक्षणैः किं प्रयोजनम्? ।।**[6]
**अपास्यमरणं जीवं प्रपश्यन्ति शुभाशुभम्।**
**मरिष्यति यदा दैवात्कोभुङ्क्ते तच्छुभाशुभम्।।**
**तस्मात्सर्व प्रयत्नेन आयुः स्थानं विचिन्तयेत्।**
**बालस्य जन्ममात्रेण जन्मारिष्टं विचारयेत्।।**[7]

पूर्वजन्मकृतशुभाशुभकर्मणां फलं भोक्तुं जीवः अस्मिन् लोके जन्म प्राप्नोति। अस्य जन्मान्तरावधिं "आयुः" इति कथ्यते। प्रारब्धादीनां अनुसारमेव तस्मै दीर्घायुः, मध्यमायुः, अथवा अल्पायुः लभ्यते। यथोक्तकर्मफलभोगसमाप्तेः अनन्तरमेव तस्य प्राणिनः मृत्युर्भवति। द्वित्रिंशत्पूर्वमल्पायुः, ततः चतुः षष्ठी पर्यन्तं मध्यमायुः ततः परं दीर्घायुः भवति। परन्तु, शतात्परमायुरुत्तमायुः भवतीति शास्त्रैः वर्णितम्। यथा-

**पूर्वकर्मफलं भोक्तुं जन्तोर्यदिह जीवनम्।**
**आयुस्तत्कर्मशक्त्यास्य दीर्घमध्याल्पतादिकम्।।**
**अवश्यमनुभोक्तव्यं यत्किञ्चित्फलमस्ति चेत्।**
**येन केनापि योगेन न भुक्त्वायं म्रियेत तत्।।**[8]
**त्रिविधाश्चायुषां योगाः स्वल्पायुर्मध्यमोत्तमाः**
**द्वित्रिंशत्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत्।**
**चतुःषष्ट्याः पुरस्तात्तु ततो दीर्घमुदाहृतम्**
**उत्तमायुः शतादूर्ध्वमिति शास्त्रेषु निश्चितम्।।**[9]

आयुविचारः मुख्यतः आयुरेखातः भवति। कनिष्ठाङ्गुलीपर्वतः तर्जनीं प्रति गता रेखा आयुरेखा भवति। यस्याविच्छिन्नायुरेखा तर्जनीं यावत् गच्छति सः मनुष्यः शतायुषः, मध्यमां यावद्गच्छति

---

[5] **बृहत्संहिता, अ.-६८, श्लो. -०१**
[6] **सचित्रसामुद्रिकरहस्यम्, बालाऽरिष्टविचारः, श्लो.-०१**
[7] **पञ्चस्वरा, अ.-०१, श्लो.- ०७-०८**
[8] **प्रश्नमार्गः, अ.-९, श्लो. -४५,४६**
[9] **सचित्रसामुद्रिकरहस्यम्, योगावली, श्लो.-१९**

**© Association of Academic Researchers and Faculties (AARF)**

चेदशीत्यायुषः, अनामिकां यावद्गच्छति चेट्षष्ठिरायुः, कनिष्ठिकां यावद्गच्छति चेत् त्रिंशद्वा विंशत्यायुः भवति। यदुक्तम्-

**कनिष्ठाङ्गुलिदेशाच्च रेखा गच्छति तर्जनीम्।**
**अविच्छिन्नानिवर्षाणि शतमायुर्विनिर्दिशेत्।।**
**कनिष्ठाङ्गुलिदेशाच्च रेखा गच्छति मध्यमा।**
**अविच्छिन्नानि वर्षाणि अशीत्यायुर्विनिर्दिशेत्।।**
**कनिष्ठाङ्गुलिदेशाच्च रेखा गच्छत्यनामिकाम्।**
**अविच्छिन्नानि वर्षाणि षष्ठिरायुर्विनिर्दिशेत्।।**
**कनिष्ठाङ्गुलिदेशाच्च रेखा तत्रैव गच्छति।**
**त्रिशद्वा विंशवर्षाणि तस्यायुः परिकीर्तितम्।।**[10]
**रेखा: प्रदेशिनीगाः शतायुषां कल्पनीयमूनाभिः।**
**छिन्नाभिर्द्रुमपतनं बहुरेखारेखिनो निःस्वाः।।**
**एकवर्षेऽपि त्रिशत्स्याद् द्विवर्षे द्विगुणं भवेत् ।**
**त्रिवर्षे चैब नवतिस्तूर्यवर्षे शताधिकम् ।।**[11]
**कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तरालम् ।**
**करोति रेखा परमायुषःसा प्रमाणमूना तु तदूनमायुः।।**[12]

एतदनन्तरमायुविचारः ललाटरेखादपि भवति । यथा, यस्य ललाटे तिस्रो रेखाः भवन्ति सः शतायुषः । चतसृभिर्ललाटरेखाभिर्जनः नवत्यायुषः भवति । पञ्चभिर्ललाटरेखाभिर्जनः सप्तत्यायुषः । एकाग्रावस्थिताभि-र्जनः षष्टिरायुषः । बहुरेखाभिः पञ्चाशद्वर्षायुः । वक्ररेखाभिः चत्वारिशद्वर्षायुः । रेखाभिभ्रूलग्नाभिः त्रिशद्वर्षायुः। वामभागवक्राभिः विशंत्यायुषर्जनः । क्षुद्राभिः सूक्षाभिरल्पायुषर्जनः भवति । यदुक्तम्-

**तिस्रो रेखाः शतजीविनां ललाटायताः स्थिता यदि ताः ।**
**चतसृभिरवनीशत्वं नवतिश्चायुः सपञ्चाब्दा ।।**
**विच्छिन्नाभिश्चागम्यगामिनो नवतिरप्यरेखेण ।**
**केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ।।**
**पञ्चभिरायुः सप्ततिरेकाग्रावस्थिताभिरपि बष्टिः ।**
**बहुरेखेण शतार्धं चत्वारिंशच्च वक्राभिः ।।**
**भ्रूलग्नाभिस्त्रिंशद्विशतिकश्चैव वामवक्राभिः ।**
**क्षुद्राभिः स्वल्पायुर्च्यूनाभिश्चान्तरे कल्प्यम् ।।**[13]

---

[10] हस्तसञ्जीवनम्, रेखाविमर्शाधिकारः, श्लो.-५२-५५
[11] सचित्रसामुद्रिकरहस्यम्, आयुरेखावर्णनम्, श्लो.-३७-३८
[12] बृहत्संहिता, अ.-७०, श्लो.-१३
[13] बृहत्संहिता, अ.-६८, श्लो.-७५-७८

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

- **सामुद्रिकशास्त्रानुसारेण अन्यान्यल्पायुर्लक्षणानि –**

1. आयुरेखा लघ्वी भग्ना च भवति चेत्मनुष्यः अल्पायुः भवति।[14]
2. उच्चनेत्रयुक्ता स्त्री अल्पायुः भवति।[15]
3. तर्जनीमध्यभागे यदि अङ्गुली अस्ति तर्हि मनुष्यः अल्पायुः भवति।[16]
4. यस्य मनुष्यस्य हस्ते हृदयरेखा शनिस्थानरूढा शाखाविहीना च भवति सः अल्पायुः भवति।[17]
5. यदा स्वान्तरेखा अशुद्धा भवति तदा मनुष्यः अल्पायुः भवति अपि च हृद्धाते तस्य मृत्युर्भवति।[18]
6. यदि भाग्यरेखा मातृरेखामछित्त्व शनिपर्वतं यावद्गच्छति तर्हि मनुष्यः अल्पायुः भवति।[19]
7. विछिन्नाऽथवा स्वल्परेखाभिः विलूनाऽयुरेखा अकालमृत्युदायका।[20]
8. स्वल्पा मन्दगा च मातृरेखा अकालमृत्युदायका। [21]
9. यदि वृषणौ ह्रस्वौ, क्षुद्रौ वा स्तः, तर्हि जातकः अल्पायु, दुर्बलः च भवति।[22]
10. चिरमैथुनगामी जन अल्पायुर्भवति ।[23]

- **सामुद्रिकशास्त्रानुसारेण अन्यानि दिर्घायुर्लक्षणानि –**

1. यस्य मनुष्यस्य कर्णः दीर्घः तथा दीर्घलोमयुक्तः भवति सः मनुष्यः दीर्घायुषः भवति।[24]
2. दीर्घाङ्गुलीयुक्तः मनुष्यः दीर्घायुषः भवति।[25]
3. दीर्घाङ्गुलिपर्वाणः जनः दीर्घायुषः भवति ।[26]

---

**[14] लघ्वी भग्ना चाल्पजीवी मनुष्यः।, सचित्रसामुद्रिकरहस्यम्, पितृरेखाफलम्, श्लो.-०६**

**[15] उन्नताक्षी न दीर्घायुः।, सचित्रसामुद्रिकरहस्यम्, प्रमदालक्षणम्, श्लो.-०६**

**[16] दरिद्रोऽद्धुतस्तर्जनीमूलदेशोऽङ्गुली स्याद्यदा यस्य मध्येऽल्पमायुः।, सचित्रसामुद्रिकरहस्यम्, विशेषाङ्गशुभवर्णनम्, श्लो.-३९**

**[17] शनिस्थानरूढा हि शाखाविहीना बलान्मृत्युदाल्पायुषो दायिका सा ।, सचित्रसामुद्रिकरहस्यम्, आयुरेखाफलम्, श्लो.-०५**

**[18] यदा स्वान्तरेखा नहि स्याद्विशुद्धा तदायुः कृशं हृद्व्यथातोस्य मृत्युः।, सचित्रसामुद्रिकरहस्यम्, आयुरेखाफलम्, श्लो.-०७**

**[19] विलूनाऽथवा स्वल्परेखाभिरायु- स्यतदाऽकालमृत्युं भजेन्मानवोऽसौ ।, सचित्रसामुद्रिकरहस्यम्, योगावली, श्लो.-१७**

**[20] मातृरेखामछित्त्वैव भाग्यो यदा सौरिगेहं व्रजेत् स्वल्पमायुस्तदा।, सचित्रसामुद्रिकरहस्यम्, योगावली, श्लो.-१८**

**[21] स्वल्पा सा मन्दगा चेत्प्रविशति मनुजोऽकालमृत्योर्मुखे सः।, सचित्रसामुद्रिकरहस्यम्, शिरोरेखाफलम्, श्लो.- ०१**

**[22] जलमृत्युरेकवृषणो विषमैः स्त्रीचञ्चलः समैः क्षितिपः ।
ह्रस्वायुश्चद्वद्धैः प्रलम्बवृषणस्य शतमायुः ॥, बृहत्संहिता, अ.-६८, श्लो. -०९**

**[23] शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाऽल्पायुः ॥, बृहत्संहिता, अ.-६८, श्लो. -१६**

**[24] दीर्घलोमश्रवा यस्तु दीर्घ-कर्णश्च यो भवेत् ।
वक्ता हि निर्दयश्चैव दीर्घायुर्नृपसेवकः ॥, सचित्रसामुद्रिकरहस्यम्, केशवर्णनम्, श्लो.- ०२**

**[25] हस्ताङ्गलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम् ।, सचित्रसामुद्रिकरहस्यम्, हस्ताङ्गुलिलक्षणम्, श्लो.- २४**

**[26] दीर्घाङ्गुलिपर्वाणः सुभगो दीर्घायुषश्चैव ॥, सचित्रसामुद्रिकरहस्यम्, अंगुष्ठाङ्गुलिलक्षणम्, श्लो.- २९**

4. आरोग्याङ्केन सह मिलित्वा यदि पित्राङ्कः विशदः शुभः दृश्यते तर्हि जातकः दीर्घजीवी, निरोगी, पराक्रमी च भवति।[27]
5. यदि जानु मांसयुक्तं, समं, सुशोभनं च भवति, तर्हि जातकः राजसंपन्नः, ऐश्वर्ययुक्तः, दीर्घजीवी च भवति।[28]
6. यदि वृषणौ दीर्घौ, प्रलम्बौ, सुगठितौ च स्तः, तर्हि सः पुरुषः शतवर्षपर्यन्तं दीर्घजीवी भवति।[29]
7. शुकनासिकायुक्तः जनश्चिरजीववी भवति।[30]
8. करोटिसदृशशिरसां जनानां मृत्युः बहुकालेन भवति।[31]
9. शीघ्रमैथुनगामी नरः दीर्घायुर्भवति ।।[32]
10. आयुरेखा यदि स्वच्छा, दीर्घा, अखण्डा च दृश्यते तर्हि तादृशः पुरुषः दीर्घजीवी, सद्गुणसम्पन्नः, सुखी च भवति।[33]

- **निष्कर्ष-**

आयुविचारः सामुद्रिकशास्त्रस्य एकः प्रमुखः अङ्गः अस्ति। कररेखासु जीवनरेखा दीर्घा, गम्भीरा च सति दीर्घायुषं सूचयति, खण्डिता वा दुर्बला सति अल्पायुषं दर्शयति। मुखलक्षणेषु प्रभास्वरवर्णः, विशालनेत्राणि, समदन्ताः च दीर्घजीवनस्य सूचकाः, यत्र पुनः पीतवर्णः, विकृतमुखं, रोगयुक्तदन्ताः च अल्पजीवनस्य चिह्नानि। शरीरलक्षणेषु स्थिरगति, उन्नतललाटं, सुदृढगात्रं च दीर्घायुषं बोधयन्ति, कृशगात्रत्वं तु अल्पायुषं प्रदर्शयति। पादेषु स्वस्थनखाः, सुस्थिरगति च चिरायुयुषं दर्शयन्ति, पीतनखाः विकृतपादः वा अल्पजीवनस्य सूचकः।

---

[27] **आरोग्याङ्का भवति यदि चेदल्परक्ता तदानीम् रोगैः शून्यो मनुजनिवहो मोदते शर्मायुक्तः।**
**रेखैषैव श्रयति जनकं चिन्तितो दुःखदुःखी हित्वा पित्राङ्कमिह विशदो दीर्घजीवो बलाढ्यः ।।, सचित्रसामुद्रिकरहस्यम्, आरोग्य-(स्वास्थ्य)-रेखाफलम्, श्लो.- ०१**
[28] **निर्मांसजानुम्रियते प्रवासे सौभाग्यमल्पैर्विकटैर्दरिद्राः।**
**स्त्रीनिर्जिताश्चैव भवन्ति निम्नै राज्यं समांसैश्च महद्भिरायुः ।।, बृहत्संहिता, अ.-६८, श्लो. -०६**
[29] **जलमृत्युरेकवृषणो विषमैः स्त्रीचञ्चलः समैः क्षितिपः।**
**ह्रस्वायुश्चद्बद्धैः प्रलम्बवृषणस्य शतमायुः ।।, बृहत्संहिता, अ.-६८, श्लो. -०९**
[30] **भोगी त्वनिम्नगण्डो मन्त्री सम्पूर्णमांसगण्डो यः।**
**सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ।।, बृहत्संहिता, अ.-६८, श्लो. -६०**
[31] **परिमण्डलैर्गवाढ्याश्छत्राकारैः शिरोभिरवनीशाः।**
**चिपिटैः पितृमातृघ्नाः करोटिशिरसां चिरान्मृत्युः ।।बृहत्संहिता, अ.-६८, श्लो. -७१**
[32] **शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाऽल्पायुः ।।, बृहत्संहिता, अ.-६८, श्लो. -१६**
[33] **दीर्घा स्पष्टा नातिसूक्ष्मा न वक्रा भग्ना चासावन्यया नापि छिन्ना।**
**दीर्घायुष्मान् सञ्चरित्रस्वभावः मों नित्यं मोदते सौख्ययुक्तः ।।, सचित्रसामुद्रिकरहस्यम्, मतान्तरेणानयाऽऽयुवो ज्ञानम्, श्लो.- २९**

- **सन्दर्भग्रन्थसूची-**


1. नारदसंहिता, नारदमुनिः, चौखम्बासंस्कृतसंस्थान, वाराणसी, 1996
2. बृहज्जातकम्, वराहमिहिराचार्यः/ केदार जोशी, मोतिलालबनारसीदास, वाराणसी, 2009
3. बृहत्संहिता, आचार्यवराहमिहिरः / अच्युतानन्दझा, विद्याभवनसंस्कृत ग्रन्थमाला, वाराणसी, 1959
4. सचित्रसामुद्रिकरहस्यम्, स्व. पं. श्रीकालिकाप्रसादशर्मा, ज्योतिषप्रकाशन, वारणसी, 2011
5. चाणक्यनीतिशास्त्रम्, आचार्यचाणक्यः, अश्विनीपाराशर, डायमंडबुक्स, 2015
6. चरणव्यहसुत्रम्, महर्षिशौनकः, आचार्यमहिदासः, चौखम्बासंस्कृतसिरिजआफिस, वाराणसी 1995
7. पञ्चस्वरा, श्रीप्रजापतिदासः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2013
8. प्रश्नमार्गः, आचार्यगुरुप्रसादगौड़, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2014
9. हस्तसञ्जीवनम्, सुरकान्तझा, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2017


*************